# chakrastutiH by shrIvAdirAjatIrtha guruvarya

# શ્રીવાદિરાજતીર્થગુરુવર્યવિરચિતા ચક્રસ્તુતિઃ

## Document Information

Text title : chakrastutiH

File name : chakrastutiH.itx

Category : vishhnu, vAdirAja, vishnu

Location : doc_vishhnu

Author : Vadiraja

Transliterated by : Krishnananda Achar

Proofread by : Krishnananda Achar

Latest update : June 13, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 14, 2020

*sanskritdocuments.org*

chakrastutiH by shrIvAdirAjatIrtha guruvarya

# શ્રીવાદિરાજતીર્થગુરુવર્યવિરચિતા ચક્રસ્તુતિઃ

દોષૌઘવારણં યસ્ય ધારણં મોક્ષકારણમ્ ।
ન વૈદિકં તપ્તચક્રધારણં યદિ મનસે ॥ ૧॥

ગ્રન્થાદૌ મઙ્ગલં તર્હિ કસ્માન્નાવૈદિકં તવ ।
શિષ્ટાચારાત્ સ્મૃતિઃ કલ્પ્યા સ્મૃતેશ્ચ શ્રુતિકલ્પના ॥ ૨॥

યદિ તત્ર તથૈતસ્મિન્ કિન્ન કલ્પયસિ શ્રુતિમ્ ।
દ્વારકાયાયિભિઃ સર્વૈરદ્યાપિ પ્રાક્પ્રવેશતઃ ॥ ૩॥

નિમ્બાદિત્યાનુગૈઃ પ્રાજ્ઞૈર્માયાવાદ્યેકદેશિભિઃ ।
વિષ્ણુસ્વામિમતસ્થૈશ્ચ રામાનુજમતાશ્રયૈઃ ॥ ૪॥

તત્ત્વવાદિજનાચાર્યૈઃ શિષ્ટશ્રેષ્ઠૈરનુષ્ઠિતે ।
કૈશ્ચિચ્ચીર્ણમિદં નોચેત્ત્યક્તં તદપિ નાસ્તિકૈઃ ॥ ૫॥

બહુશિષ્ટજનાચારઃ પ્રમાણમુભયત્ર ચ ।
સ્વમૂલગ્રન્થભાગેષુ તથા પ્રકરણેષુ ચ ॥ ૬॥

નિબન્ધેષુ ચ સર્વેષુ કેનાપીદં ન દૂષિતમ્ ।
અનાચારસ્તુ કેષાઞ્ચિદનાચારઃ પ્રકલ્પ્યતામ્ ॥ ૭॥

ત્યજેદેકં કુલસ્યાર્થમિતિ ન્યાયં વિજાનત ।
નૃસિંહપરિચર્યાયાં રામાર્ચાચન્દ્રિકાદિષુ ॥ ૮॥

શ્રુતિસ્મૃતિપુરાણોક્ત્યા તૈરપીદં પ્રસાધિતમ્ ।
ન નઃ પૂર્વૈઃ પરાક્રાન્તં સર્વસંપ્રતિપત્તિતઃ ॥ ૯॥

ઇદાતીનીમાગ્રહાદેવ વિવદન્તે ક્વચિત્ ક્વચિત્ ।
દુરાગ્રહગ્રહં તેષાં કેષાઞ્ચિન્મનસિ સ્થિતમ્ ॥ ૧૦॥

નિવર્તયેત્સુપ્રયુક્તઃ શ્રૌતો મન્ત્રો મહાત્મભિઃ ।
અવૈદિકમિદં ચેત્તે બ્રહ્મૈક્યં વૈદિક કુતઃ ॥ ૧૧॥

શ્રુતયસ્તત્ર ચેત્ સન્તિ ન સન્તિ કિમિહાગમાઃ ।
યદ્યેતેષામિતોન્યોર્થઃ કલ્પ્યતે સ્વકફોલતઃ ॥ ૧૨॥

શ્રુતિસ્મૃતિસમાખ્યાતસ્તત્રાન્યાર્થો ન કિં શ્રુતઃ ।
આગ્રહોયં પરેષાં ચેત્તથાયં કિન્તુ નાગ્રહઃ ॥ ૧૩॥

વાદિવિપ્રતિપન્નાભિઃ શ્રૌતત્વં તૂભયોઃ સમમ્ ।
યદ્યશ્રૌતમિદં કર્મ યજ્ઞોશ્રૌતઃ કથં ન તે ॥ ૧૪॥

તન્મૂલભૂતવેદાનામતત્વાવેદકત્વતઃ ।
અન્યાર્થકલ્પનેનાપિ તત્ત્વવેદકતા ગતા ॥ ૧૫॥

તેનૈવાવેદકત્વં ચેદધ્વરસ્ય કથં ન તત્ ।
અધુના બાધવૈધુર્યાદ્વ્યાવહારિકમાનતા ॥ ૧૬॥

સમોભયત્ર કેષાઞ્ચિન્મતે બાધોત્ર તત્ર ચ ।
વેદાપ્રામાણ્યશંસિત્વાદશિષ્ટૌ તાવુભાવપિ ॥ ૧૭॥

વ્યાવહારિકમાનત્વં મૂઢાપ્રામાણ્યમેવ હિ ।
અતપ્તધારણં ચેત્સ્યાત્તન્મૂલેનૈતદાગતમ્ ॥ ૧૮॥

સદા તદુક્તલાભાર્થમિદં પ્રાજ્ઞૈર્હિરણ્મયી ।
પવિત્રમુદ્રેવ કુશશ્રુતિમૂલા પ્રધાર્યતે ॥ ૧૯॥

કિમગ્નિનાપરાદ્ધં તે કિં ચક્રેણ મુરદ્વિષઃ ।
કિં વા સદ્ભિરનિર્ભીતૈઃ કિં પુરાણૈસ્ત્રયીગિરા ॥ ૨૦॥

નિષેધવાક્યાદ્ભીતિસ્તુ તપ્તાતપ્તાઙ્ગયોઃ સમા ।
તત્સર્વં તપ્તગં કુર્વન્ સમઃ સ્વાર્થપરાર્થયોઃ ॥ ૨૧॥

અમન્ત્રાહોમમૂલાઙ્ગવિષયં કુરુ લાઘવાત્ ।
શિષ્ટાચારવિરુદ્ધોર્થઃ સ્વસારં ચાધિરોહતિ ॥ ૨૨॥

ઇત્યાદૌ ત્યજ્યતે વેદે કિં પુનઃ સ્મૃતિકોણગઃ ।
યદિ સ્મૃતિમનાદૃત્ય શ્રુતાવનુદિતત્વતઃ ॥ ૨૩॥

વિધિં ન માનયસ્યેનં નિષેધઃ કેન માન્યતે ।
નહિ શ્રુતિસતી ધર્મમિમં ક્વાપિ નિષેધતિ ॥ ૨૪॥

સુદર્શનકૃતોદ્યોગનિષ્કણ્ટકિતપદ્ધતિઃ ।
તૂષ્ણીં સ્થિતેપિ લોકેસ્મિન્નઙ્ગીકાર ઇતીર્યતે ॥ ૨૫॥

શાસ્ત્રેપ્યપ્રતિષિદ્ધં ચેદ્ગીયતેનુમતં ત્વિતિ ।
યદિ સ્મૃત્યુક્તમાચારમશ્રૌતં મન્યતે ભવાન્ ॥ ૨૬॥

શૌચાદૌ દિગ્વિભાગં ચ વૈચિત્ર્યં મૃત્તિકાગ્રહે ।
યોગ્યાયોગ્યદિનત્વં ચ દન્તધાવનકર્મણિ ॥ ૨૭॥

કાષ્ઠે ગ્રાહ્યાગ્રાહ્યતાં ચ તથાચમનપદ્ધતિમ્ ।
ગૃહ્યોક્તં પાર્વણવિધિં ભોજ્યાભોજ્યપદાર્થતામ્ ॥ ૨૮॥

ક્રમં ષોડશસંસ્કારે શ્રાદ્ધાદીનાં દિનાન્યપિ ।
તર્હિ ત્યક્ત્વા વ્રાત્યદશામાશ્રય ત્વવિશઙ્કિતઃ ॥ ૨૯॥

સર્વધર્માન્ પરિત્યજ્યેત્યાદિવાક્યમુપાશ્રિતઃ ।
નારદીયે બૃહતિ તે બલં વાક્યચતુષ્ટયમ્ ॥ ૩૦॥

પાદ્મગારુડમુખ્યેષુ સન્ત્યસ્માકં સહસ્રશઃ ।
દ્વૈધે બહૂનાં વચનમિતિ ન્યાયેન તત્ત્યજન્ ॥ ૩૧॥

અઙ્ગીકુરુ હરેશ્ચક્રધૃતિં મુક્તિસૃતિં પરામ્ ।
અષ્ટાદશપુરાણસ્થાન્યસ્મદ્વાક્યાનિ સર્વશઃ ॥ ૩૨॥

મુખ્યાન્યુપપુરાણસ્થવાક્યેભ્યો નહિ બિભ્યતિ
પઞ્ચરાત્રસ્ય વિષ્ણૂક્તેઃ સર્વૈઃ પ્રામાણ્યમિષ્યતે ॥ ૩૩॥

પ્રતિષ્ઠાપર્વપૂજાદ્યા દેવાનાં સ્યુઃ કથં ન ચેત્ ।
શ્રુતિપ્રતીકં સઙ્ગૃહ્ય પવિત્રાખ્યાં પ્રદાય ચ ॥ ૩૪॥

તત્ર પ્રથમસંસ્કારસ્તપ્તચક્રાઙ્ક ઈર્યતે ।
તદ્વિરુદ્ધમૃષિપ્રોક્તં દુરુક્તમિતિ ગૃહ્યતે ॥ ૩૫॥

ઉભયોઃ કલહે સાક્ષી વિજાતીયો હિ માન્યતે ।
યચ્છાસ્ત્રં લિઙ્ગપારમ્યં પરં દેવમુમાપતિમ્ ॥ ૩૬॥

તમઃપ્રવર્તકં વક્તિ તામસં તત્પ્રચક્ષતે ।
ઇતિ ગારુડવાક્યેન તથા પાદ્મગતેન ચ ॥ ૩૭॥

વિષ્ણ્વાધિક્યવિરોધિત્વે પુરાણસ્મૃતિવિદ્યયોઃ ।
અપિ તામસતૈવોક્તા તતોપ્યન્યદુપેક્ષતામ્ ॥ ૩૮॥

નહિ તામસમાશ્રિત્ય તમઃ પ્રાપ્તું ત્વમર્હસિ ।

શ્રીમદ્ભાગવતં સર્વૈઃ પૂર્વૈર્નો ભવતામપિ ॥ ૩૯॥

પુરાણેષૂત્તમત્વેન શ્રુતં મતમુપાશ્રિતમ્ ।
તત્રાપિ વિષ્ણુમાહાત્મ્યરસાયનવિરોધિનામ્ ॥ ૪૦॥

શૈવોક્તિવિષબિન્દૂનાં તામસત્વમુદાહૃતમ્ ।
૧વાચં હીનાં મયા રક્ષન્ દુઃખદુઃખી ભવેદિતિ ॥ ૪૧॥

શ઼ૃણ્વન્તિ યેન્યવિષયાઃ કુકથા મતિનાશિનીઃ ।
તે તમઃ પ્રાપ્નુવન્તીતિ વન્ધ્યાં ન બિભૃયાદ્ગિરમ્૨॥ ૪૨ ॥

ઇત્યાદૌ તેન ચોક્તં નઃ સર્વં ચાર્વેવ ગમ્યતે ।
મલ્લક્ષણમિમં કાયં કૃત્વા મદ્ધર્મમાશ્રિતઃ ॥ ૪૩॥

સ્વલિઙ્ગધારણેનેતિ તત્રોક્તં ચક્રલાઞ્છનમ્ ।
શ્રુતિતાત્પર્યસિદ્ધ્યર્થે વિરોધં કુર્વતી સ્મૃતિઃ ॥ ૪૪॥

વિરોધે ત્વનપેક્ષં સ્યાદિત્યમાનત્વમેષ્યતિ ।
પવિત્રં ત ઇતિ હ્યેકા ગોવિન્દુર્બિભ્રદાયુધમ્ ॥ ૪૫॥

યેન દેવાઃ પવિત્રેણ આત્માનં પુનતે સદા ।
તેન સહસ્રધારેણ પાવમાન્યઃ પુનન્તુ મામ્ ॥ ૪૬॥

ઇત્યાદ્યૃચિ યજુર્વેદે લોકસ્ય દ્વારમિત્યપિ ।
ચરણં પૂતમિતિ ચ તથા સામ્નિ સ્ફુટં વચઃ ॥ ૪૭॥

નેમિના તપ્તસુતનુઃ સાયુજ્યં પ્રાપ્નુ યાદિતિ ।
ઉરુક્રમાઙ્કૈઃ સુભગા વયમેભિરિહાઙ્કિતાઃ ॥ ૪૮॥

ઇત્યથર્વગતં વાક્યં તથા શ્રુતિશિરસ્યપિ ।
અદ્યાપિ ગૌર્જરૈર્વિપ્રૈઃ પઠ્યમાને ગુરોર્મુખાત્ ॥ ૪૯॥

ધૃતોર્ધ્વપુણ્ડ્રઃ શ્રિતસચ્ચક્રધારી હરિં પરમ્ ।
યો ધ્યાયેત્સ મહાત્મેતિ સ્પષ્ટમર્થાન્તરોજ્જિતમ્ ॥ ૫૦॥

સન્તિ સ્મૃતીતિહાસાદ્યાઃ પુરાણાનિ ચ કોટિશઃ ।
સુદર્શનસ્ય મીમાંસા કૃતા હ્યસ્મત્પુરાતનૈઃ ॥ ૫૧॥

તત્રોદ્ધૃતેષુ વાક્યેષુ કથમેતેષુ સંશયઃ ।
યદિ વાક્યં સ્વયં કૃત્વા પ્રાવક્ષ્યન્ પૂર્વસૂરયઃ ॥ ૫૨॥

તર્હ્યર્ચ્યનેકભેદાયાં કુતો વાક્યં નિજેચ્છયા ।
વ્યાકરિષ્યન્નતિસ્પષ્ટમનર્થાન્તરસમ્ભવમ્ ॥ ૫૩॥

પ્રાવર્તન્ત કથં પૂર્વે સર્વેઽપ્યાસ્તિકમૌલયઃ ।
સ્પષ્ટૈર્વાક્યૈર્નચેત્ સર્વવિપ્લવઃ સ્યાજ્જિનોક્તિતઃ ॥ ૫૪॥

સ વક્તિ સર્વમામ્નાયં રક્ષસા કેનચિત્ કૃતમ્ ।
પવિત્રર ચરણં' ચક્રં લોકદ્વારં સુદર્શનમ્ ॥ ૫૫॥

પર્યાયવાચકા હ્યેતે ચક્રસ્ય પરમાત્મનઃ ।
પુરાણોક્તિરિયં ચક્રં પવિત્રાદ્યાખ્યયાહ હિ ॥ ૫૬॥

મર્ત્યાનુશાસનં ગ્રાહ્યં કિં પુનઃ સ્માર્તશાસનમ્ ।
પવિવત્ત્રાયતે લોકાનિતિ વ્યુત્પત્તિસમ્ભવાત્ ॥ ૫૭॥

યોગરૂઢિબલાયાતા પવિત્રાખ્યા સુદર્શને ।
ઇમાં શ્રુતિમુપાદાય પુરાણાન્યેવ સર્વશઃ ॥ ૫૮॥

પ્રમાણયન્તિ સ્વોક્તેસ્મિંસ્તપ્તચક્રાઙ્કધારણે ।
અતોઽન્યાર્થઃ શ્રુતેરસ્યાઃ કથં શક્યો મનીષિભિઃ ॥ ૫૯॥

સતિ નેતરિ માર્ગસ્ય કિમન્ધોક્તઃ ક્રમો ભવેત્ ।
પવિત્રપદનિર્દિષ્ટમર્થં વેદસ્તમેવ હિ ॥ ૬૦॥

સહસ્રધારનામોક્ત્યા ચક્રત્વં સ્પષ્ટયત્યહો ।
ષટ્કોણત્વાભિધાં ચક્રચ્છાયામદ્યાપ્યુપાદદત્ ॥ ૬૧॥

કુશગ્રન્થિરસપિ હ્યાસીત્પવિત્રાખ્યો મહીતલે ।
યથા ચિત્રસ્થસિંહસ્ય સિંહસાદૃશ્યમાત્રતઃ ॥ ૬૨॥

સિંહતાયાં મુખ્યસિંહો વન્ય એવેતિ નિર્ણયઃ ।
તથા પવિત્રનામૈ તચ્ચક્રસ્યૈવેતિ ગમ્યતે ॥ ૬૩॥

ષટ્કોણતા સર્વમતે ચક્રસ્યૈવ હિ લક્ષણમ્ ।
આગમોક્તં પવિત્રં ચ ષટ્કોણગ્રન્થિતોઽભવત્ ॥ ૬૪॥

અતોઽન્યાર્થકથા વાતાહતા શુષ્યલતાભવત્ ।
તત્પવિત્રમિદં વ્યાપ્તં યત્ત્વં પર્યેષિ વિશ્વતઃ ॥ ૬૫॥

ઇતિ શ્રુત્યુદિતં વિષ્ણુવ્યાપ્ત્યા વ્યાપ્તત્વમેવ ચ ।
ચક્રવોચિતં વિપ્રકુશસ્યાત્યન્તબાધિતમ્ ॥ ૬૬॥

પ્રાક્પ્રસક્તપવિત્રેણ તસ્માતસ્ત્વમિષ્યતે ।
પઞ્ચાગ્નિકૃતતાપોક્તૌ દૂષણદ્વયવાગતમ્ ॥ ૬૭॥

પ્રસક્તસ્ય પરિત્યાગો હ્યપ્રસક્તપરિગ્રહઃ ।
આમત્વોક્ત્યા તસ્ચક્રદાહાભાવો હિ દૂષ્યતે ॥ ૬૮॥

અગ્નિ દૂરસમીપસ્થવસ્તુન્યાત્મત્વસામ્યતઃ ॥

શ઼ૃતાસ ઇતિ શબ્દાર્થા દાહવન્તો ન તાપસાઃ ॥ ૬૯॥

પાદોક્તૌ સ્યાત્ પવિત્રેણેત્યેતદ્વ્યર્થં પદાન્તરમ્ ।
ચક્રં પ્રયુજ્ય નિબિડં તમો નિર્ભિદ્ય રન્ધ્રતઃ ॥ ૭૦॥

અનન્તાસનલોકં સ્વં પ્રાપ કૃષ્ણઃ સહાર્જુનઃ ।
ઇતિ પૌરાણિકખ્યાત્યા લોકસ્ય દ્વારતાપિ ચ ॥ ૭૧॥

ચક્રસ્યૈવોચિતાન્યત્ર શક્યોતોર્થો ન શઙ્કિતુમ્ ।
અપિ ચાર્થદ્વયે પ્રાપ્તે સમાખ્યૈકાર્થસાધિકા ॥ ૭૨॥

તત્પુરાણસમાખ્યાનાદર્થોયમવધાર્યતે ।
મીમાંસાભિધવિખ્યાતસીમાસામ્રાજ્યકારિભિઃ ॥ ૭૩॥

યદ્યપ્યામ્નાયમાર્ગેસ્મિન્ વક્તું બહુ ચ શક્યતે ।
તથાપ્યલ્પરણોદ્યોગે યોદ્ધુઃ શૂરસ્ય નોચિતં
મહાપ્રાકારકરણમિતિ મત્વોપરમ્યતે ॥ ૭૪॥

કુમતધ્વાન્તનિર્ભેદી સ્વમતામ્ભોધીસમ્ભ્રમઃ ।
હયગ્રીવોલ્લસચ્ચન્દ્રપાદઃ ખેદાપહોસ્તુ નઃ ॥ ૭૫॥

હયગ્રીવપદદ્વન્દ્વચિન્તનાસક્તચેતસા ॥

યતિના વાદિરાજેન ચક્રસ્તુતિરિયં કૃતા ॥ ૭૬॥

॥ ઇતિ શ્રીમદ્વાદિરાજપૂજ્યચરણવિરચિતા ચક્રસ્તુતિઃ સમ્પૂર્ણા ॥

ભારતીરમણમુખ્યપ્રાણાન્તર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ।

Footnotes

૧ ગાં દુગ્ધદોહામસતીં ચ ભાર્યાં દેહં પરાધીનમસત્પ્રજાં ચ ।
વિત્તં ત્વતીર્થીકૃતમઙ્ગવાચં હીનાં મયા રક્ષતિ દુઃખદુઃખી ॥

૨ યસ્યાં ન મે પાવનમઙ્ગ કર્મ સ્થિત્યુદ્ભવપ્રાણનિરોધમસ્ય ।
લીલાવતરેપ્સિતજન્મ ના સ્યાદ્વન્ધ્યાં ગિરં તાં બિભ્રયાન્ન ધીરઃ ॥

-શ્રીમદ્ભાગવત (૧૧/૧૧/૧૯,૨૦)

Encoded and proofread by Krishnananda Achar

*chakrastutiH by shrIvAdirAjatIrtha guruvarya*

pdf was typeset on June 14, 2020

Please send corrections to *sanskrit@cheerful.com*